International Journal of Sanskrit Research 2020; 6(2): 151-152

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(2): 151-152
© 2020 IJSR
www.anantaajournal.com
Received: 06-01-2020
Accepted: 09-02-2020

**पङ्कज कुमार माहाना**
संस्कृतविभाग: उत्तर ओडिशा
विश्वविद्यालय: द्वितीयपरिसर: केन्दुझर:,
ओडिशा, भारत।

**Corresponding Author:**
**पङ्कज कुमार माहाना**
संस्कृतविभाग: उत्तर ओडिशा
विश्वविद्यालय: द्वितीयपरिसर: केन्दुझर:,
ओडिशा, भारत।

# हे मदीय दूरबन्धो -इति कविता संग्रहे कविप्रतिभावैचित्रम्

**पङ्कज कुमार माहाना**

### १. काव्य कविता धारा-

आधुनिककाव्य कविता धारायां साहित्यस्य निसर्ग प्रभाव: सर्वदा सर्वे परिलक्ष्यते विद्यते यत्र स्मृति –संकल्प-वेदना-मिलनं –विरह: सर्वेमेव एकी भूय पदपट्टले स्फृटि भवति । आधुनिक: कवितायां दृष्टिपथारूढ भवति तादृश प्रियाविरह भावावेग यथा-

> हे हृदय / याहि दूरं तिरुवनन्तपुरम् । तया विनाहमस्मि /विवर्णवैखरी/ भावहीना भाषामयी /स्थुला सुन्दरी विखण्डिता /, विचलिता कृशोदरी ।[१]

भावएव भाषाया आधारभूतासती छन्दमयी कवितं वर्णयति स्वकीय कल्पना विलास वैभवेन सहृदय हृदयं वहुदारञ्जयति, आकुलिकरोति चित्रलोतिकां मनांसि भृसं प्रफुल्लयति भाषाया: विदग्ध हृदयं शीतलं करोति नैराश्यं प्राणपतत्रिं आशानिझरन्या: स्नापयति । अत: भावस्य परिभाषा विस्मृत । शव्दार्थ माध्यमभूत इति हृदयानुभूति रसधारं जनयति । भारतीयसंस्कृतौ यद्यपि जीवनस्य नस्वरता विनिश्रिता तथापि चतुवर्ग: फलप्राप्ति: हेतुभूत काव्यस्य प्रोयजनं नितरां विद्यते इति । आधुनिक: नैराश्यपूर्णवनयात्रायां, वर्त्तमानकालीन विषमतायां काव्यस्य अमृतमयीधारा अवश्यं जीवनस्य अपातमधुर चाकचकयं जनयति ।
आधुनिकतापरिपूर्ण कवितायां लोकचेतना अपरिहार्या । सामाजिक- आर्थिक-धार्मिक- राजनीतिक वैशम्ये लोकचेतना जागरणं कवे: मुख्य लक्ष्यं भ्वति । तत्र लोक शव्द्स्य व्याख्याने अभिनवगुप्त कथनोमेवं यथा-

> लोकोनाम जनपदवासी जन:/ जनपदश्च देश एव [२]

तत्र लोकशव्दस्य अर्थान्तरं जनसामान्यं । साहित्ये लोकशव्दमुपजीव्य लोकसाहित्यं,लोककला, लोककथा, लोकगितं लोकसंस्कृति, लोकनाटयं, लोकनृत्यं इत्यादि शव्दा: लोककथा, लोकगीतं लोकसंस्कृति, लोकनाटयं, लोकनृत्यं इत्यादि शव्दा:लोकचेतनाया: अन्तर्भुक्ता भवन्ति ।

### २. पराम्बा योगमाया कृतय: -

**उत्कलप्रदेशस्य नयागड** जिल्ला वास्तव्या कवयत्रि परम्बा श्रीयोगमाया भवति सरस्वत साधिका नारी प्रतिभाषु सा आपि अनन्या प्रतिभा शालीनि । तासां कृतय: यथा-

१. **मन्दाकिनी** (संस्कृतप्रबन्धसंग्रह:), लोकभाषाप्रचारसमिति:, भद्रक:,२००७
२. **मृत्यु:चन्द्रसम:**(वैज्ञानिककथावस्ताधारिताद् ओडियामूलाद् अनूदित उपन्यास:) संस्कृतभारती, नवदेहली,२००९
३. **सम्पर्क:**(कथासग्रह:) संस्कृतभारती,नवदेहली, २०११
४. **हे मदीय दूरबन्धो,** (कवितासग्रह:) कोलकाता,२०११
५. **उपनिषत्सु प्राणविद्या** (शोधग्रन्थ:) (यन्त्रस्थ:)

परम्बा रचित - हे मदीय दूरबन्धो इत्याख्या कविता संग्रहे स्वयं कवयत्रि कविता संग्रहस्य प्राकथने पुस्तकस्य अन्तभावं परिप्रकाशयति यथा- असमये अनारतं वारिपात: अथवा अनावृष्टि: पृथिविनायिकाया: कृते मेघस्य अस्वाभाविकता अथवा असहायता। दूरबन्धु शब्देन उभयो: एकदेशावस्थानराहित्यं संसूचितं भवति ।

भूमिमेघयो: एकदेशावस्थानं न सम्भाव्यते लोकदूयत्वातपृथिवीलोक: अन्तरीक्षलोकश्चेति । एवं जीवब्रह्मो: दुरत्वं (१-१४ कवितासु) सामाजिकतत्त्वेभ्य: साम्प्रतिकसमाजस्य दूरत्वं (१५-३३ कवितासु) तथा समाजे कश्मिश्चित् कोमलमधुकरसंम्पर्के दूरत्वमिति (३४-४० कवितासु) वर्णितमिति पृष्ठभूमिमाधृत्य कवितासंग्रहस्यास्य शीर्षकं हे मदीय दूरबन्धो इति ।
एवं संसारक्षेत्रेऽपि । स्वप्रियविरहगं दु:खं किञ्चित् विलक्षणं बवति । आपातत: दिनचर्यासु कालं यापयन्त्यपि विप्रलब्धा क्षणमात्रपि स्वप्रियं न विस्मरति ।
सदैवासन्नप्राप्ते: आशाबन्ध: प्रतिक्षणं स: बन्ध: भग्न: भवति तथा परक्षणे पुन: प्रोरोहति । एवं प्राप्तप्राप्तयो: छायार्ति: कविता: । प्रायेण कस्यचिदन्तस्तत्तस्याभावबोधस्य व्यथा अत्रत्यानां कवितानामन्त: स्वर: ।

**कतिपयकवितामनुशीलनम्**

**१. आशा-**

कवयित्री कथयति प्रतिपदं भावना विभाषपूर्णा ।तथा प्रतिपदं जीवने परिक्षा आयाति । अशेष दुखे प्रति पदं विस्मृतम् । तथा-

विलसति मृदुहासस्तव मूर्त्तमूर्त्ती
न भवति स्मितहासे विषमो विलाप: ।
विलसति प्रविलापो मम नेत्रगात्रे
प्रवहति नेत्रनीरं तव पद्मपादे ।।[३]

**२. न जाने ...**

काहं ? कुतरागता ? कुत्र पुनर्मे गमनम् ?
किं लक्ष्यं जीवनस्य ? कुत्र पुनर्मे विलय: ?
न जाने त्वदृते किञ्चित्
प्रभो ! न्न जाने, न जानेऽहम् ।।
भावना मे विभावना कदा वा काचित्
श्वप्नस्तु ममैकदा त्वया सहासीत् ।[४]

अत्र कवयत्रि कल्पयति जननमरण चक्रक विहविषयकं तथ्यं यत्र जीवनस्य लक्ष्यम् वहुधा उदेति तस्यति च प्रतिधानात् अवसात् अत्र प्रभुपदं संस्मृत्य भावप्रवणां कवि स्वस्य सरणागतीं प्रदर्शयति ।

**३. त्वमेव...**

सामाजिक जनजीवने सम्पर्क: सम्यकतया न भवति । त्वम् सदा सर्वदा सहाय: भव ।यथा-

त्वत्कृते हि सर्वं मया विस्मृतं
भवतु सुखमथवा दु:खम् ।
उपेक्षिता मया स्वशरीरपीडा
विस्मृताप्यवसरस्य बेला ।
यतस्त्वमेव महानन्दमय:
जगति केवलम् ।।[५]

अत्र कविभावना सम्वदनापूर्णा व्यथिभूता य: मन्यते यत्र स्वस्य निरपेक्षत्व भगवत अपेक्ष्यत प्रतिभाति । यत: भगवत्तमनन्तरा सर्व निष्फलं विफलं कलाहल; मयं लक्षते ।

**४. हे अतीतकाल:**

त्वया प्रदत्तो विफलप्रयत्न:
कश्चिन्मानसिकभार:
अज्ञातोऽभिशाप:
त्वमसि निष्ठुरहृदय: ।।
यदि कश्चिद्दोषो दृष्ट:
कथं तत्र संशोधित:
त्वयि स्थितेऽपि मार्गदर्शके
कथं पथिको दिग्भ्रान्त: ??[६]

अर्थात् जीवनस्य अतीतं लक्षविरोहितं भावच्युतं स्वप्नसन्तप्तं विश्वप्रपञ्चज्वाला संकुलितं विद्यते इति ।

**५. केयं व्यवस्था**

वालो विस्मरति धूलिकाक्रीडां
यन्त्रांशघर्घरे स्वशरीरपीडाम् ।
निजयति विस्मर्तुमुदरबुभुक्षां
गृहजना वाञ्चन्ति उपार्जनक्षमताम् ।।
सार्वभौमगणतन्त्रे रीतिरेषा

**केयं सभ्यसमाजव्यवस्था ??[७]**

इदानिन्तनं सामाजिक परिस्थितिदुस्थिति मापत्ना इति मति : कविताया मुक्खाशय । यत्र गणतन्त्रव्यवश्था दुरावस्था मघगिता आकाक्षायं सन्यांऽपि वाञ्छा न पूर्यते । नैष्युल्य मासाध्यत, वैफुल्यं मनुगम्यते इति ।

**६. संस्कृति:**

मा तुलयतु कदाचित् नाहं तुलनार्हा
अविश्वासस्य पात्री नाहं कदा भविता ।
मिथ्यारोपेण कदाचित् नाहं दूषणीया
संस्कारेणाभिरामा सुरम्या ।।[८]

परम्बा श्रीयोगमाया रचित कविता संग्रहधारीकृत्य प्रमुख विन्दव: तथा सारकथा संन्धर्भश्च मया विस्तारभयात् संक्षिप्तरित्या संप्रस्तुतोऽस्ति ।।

**पादटिप्पणी**

१. हृदय-५
२. अ.भा.,भा-२-पृ.२१३
३. आशा. पृ.१०
४. न जाने.पृ.१३
५. त्वमेव..पृ.१६
६. हे अतीतकाल..पृ.४२
७. केयं.व्यवस्था.पृ.४७
८. संस्कृति. पृ.४४

**सहायकग्रन्था:**

१. पत्रप्रिया-प्रो. प्रफुल्लकुमारमिश्र:, पक्षीघर प्रकाशनी, भूवनेश्वर:, प्रथम प्रकाश: -२०१३
२. हे मदीय दूरबन्धो, कवयित्री, डा. परम्बा श्रियोगमाया, रामकृष्ण मिशन् आश्रम:, कलिकता,२०११